# श्री गणेश पंचरत्न स्तोत्रं

मुदा करात्तमोदकं सदा विमुक्ति साधकं | कलाधरावतंसकं विलासि लोकरञ्जकम् ||
अनायकैक नायकं विनाशितेभदैत्यकं | नताशुभाशुनाशकं नमामि तं विनायकम् || १ ||

नतेतराति भीकरं नवोदितार्क भास्वरं | नमत्सुरारि निर्जरं नताधिकापदुद्धरम् ||
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं | महेश्वरं तमाश्रये परात्परं निरन्तरम् || २ ||

समस्तलोक शंकरं निरस्तदैत्य कुञ्जरं | दरेतरोदरं वरं वरेभवक्त्र मक्षरम् ||
कृपाकरं क्षमाकरं मुदाकरं यशस्करं | नमस्करं नमस्कृतां नमस्करोमि भास्वरम् || ३ ||

अकिंचनार्ति मार्जनं चिरंतनोक्ति भाजनं | पुरारिपूर्व नन्दनं सुरारिगर्व चर्वणम् ||
प्रपञ्चनाश भीषणं धनंजयादि भूषणं | कपोलदान वारणं भजे पुराण वारणम् || ४ ||

नितान्तकान्त दन्तकान्ति मन्तकान्त कात्मजं | अचिन्त्य रूपमन्तहीन मन्तराय कृन्तनम् ||
हृदन्तरे निरन्तरं वसन्तमेव योगिनां | तमेकदन्त मेव तं विचिन्तयामि संततम् || ५ ||

महागणेश पञ्चरत्न मादरेण योन्वहं | प्रगायति प्रभातके हृदि स्मरन् गणेश्वरम् ||
अरोगता मदोषतां सुसाहितीं सुपुत्रतां | समाहितायु रष्टभूति मभ्युपैति सोचिरात् || ६ ||

|| इति श्री शंकाराचार्य कृत गणेश पंचरत्न स्तोत्रं सम्पूर्णं ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133